दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-151 | 1 | मार्च 24, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लषष्ठी
चैत्र 10 प्रविष्ठांशः मङ्गलमयः भवेत्

2 विश्व-क्षयरोग-दिवसः-: राष्ट्रपति-महोदयायाः आह्वानम्

3 सरदार पटेल विश्वविद्यालये मंडी इत्यत्र आयोजितः शहीदीदिवस-कार्यक्रमः

4 पितामहः भीष्मः महान् ज्ञानी, दृढव्रतश्च आसीत्। परन्तु तस्मिन् अन्नदोषस्य दुष्प्रभावस्य कारणतः बुद्धिभ्रमः सञ्जातः

## लोकसभायाम् 'वित्त-विधेयकं २०२६' चर्चायै स्वीकृतम्; विपक्षेण वृत्तिहीनतायाः विषयः उत्थापितः

लोकसभायां षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य वित्त विधेयकं चर्चायै स्वीकृतम्। अस्य विधेयकस्य उद्देश्यं षड्विंशत्यधिक-द्विसहस्रतम-वर्षतः सप्तविंशत्यधिक-द्विसहस्रतम-वित्तवर्षपर्यन्तं केन्द्र-सर्वकारस्य वित्तीय प्रस्तावानां विधिसम्मततया प्रवर्तनं इति वर्तते। लोकसभायां वित्तमन्त्री निर्मला सीतारामन् इत्येषा एतं विधेयकं पुरःस्थापितवती । चर्चायाः आरम्भे काङ्ग्रेस-पक्षस्य डॉ. अमर सिंहेन देशे वृत्तिहीनतायाः विषयः उत्थापितः। तेन आरोपितं यत् कतिपय-संस्थानानि एव सर्वकारेण प्रदत्तस्य कर-मुक्तेः लाभं प्राप्नुवन्ति।

## विधानसभा-निर्वाचनम्

### असम-केरल-पुडुचेरी-राज्येषु नामाङ्कन-प्रक्रिया समाप्ता

असम-केरल-पुडुचेरी-राज्यानां विधानसभानिर्वाचनार्थं नामाङ्कन-प्रक्रिया गतदिने सायंकाले समाप्ता। अद्य नामाङ्कनानां परीक्षणं भविष्यति। अभ्यर्थिनः गुरुवासरपर्यन्तं नामाङ्कनं प्रत्याहर्तुं शक्नुवन्ति। एतेषु राज्येषु केन्द्रशासितप्रदेशेषु च मतदानम् आगामि-मासस्य नवम-दिनाङ्के एकस्मिन् चरणे भविष्यति। नागालैण्ड-राज्ये अपि कोरिडांग-निर्वाचनक्षेत्रस्य आगामि-विधानसभा-उप-निर्वाचनार्थं नामाङ्कनपत्राणां प्रस्तुतीकरण-प्रक्रिया अद्य समाप्ता। मतगणना मई-मासस्य चतुर्थ-दिनाङ्के भविष्यति।

## उत्तरकोरिया-देशस्य नेता किम-जोंग-उन 'राज्यकार्य-आयोगस्य' अध्यक्षत्वेन पुनः नियुक्तः

प्योङ्याङ्ग-नगरे सर्वोच्चजनसभायाः उपवेशनस्य अनन्तरं उत्तरकोरिया-देशस्य नेता किम-जोंग-उन 'राज्यकार्य-आयोगस्य' अध्यक्षत्वेन पुनः नियुक्तः । षोड्शधिक-द्विसहस्रतमे वर्षे संस्थायाः स्थापनायाः अनन्तरं एषः तस्य निरन्तरं तृतीयः कार्यकालः अस्ति।

## पश्चिम-एशिया-क्षेत्रे सङ्घर्षे सत्यपि भारते कोऽपि ऊर्जा-सङ्कटः नास्ति, देशे च इन्धन आपूर्तिः स्थिरा वर्तते - प्रधानमन्त्री



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना लोकसभायां पश्चिम-एशिया-क्षेत्रस्य साम्प्रतिक-सङ्घर्ष-विषये प्रोक्तं यत् अस्मिन् सङ्कटकालेऽपि भारते ऊर्जा सङ्कटः नास्ति । तेन स्पष्टीकृतं यत् देशे पैट्रोल-डिज़ल इत्यनयोः च आपूर्तिः सुचारुरूपेण प्रचलति । प्रधानमन्त्रिणा प्रतिपादितं यत् भारतस्य समीपे त्रि-पञ्चाशत्-लक्ष-मीट्रिकटन-परिमितं रणनीतिक-पेट्रोलियम-भण्डारः वर्तते । तेन सूचितं यत् सर्वकारः पञ्चषष्टि-लक्ष-मीट्रिक-टनमिताय भण्डारणाय कार्यं करोति। विगतैकादशवर्षेषु भारतस्य परिशोधन-क्षमता गम्भीररूपेण प्रवृद्धा। प्रधानमन्त्रिणा प्रोदीरितं यत् सर्वकारः विभिन्न-देशानां आपूर्ति-कर्तृभिः सह निरन्तरं सम्पर्क स्थापयति येन तैल-वातेन्धनयोः आपूर्तिः अविच्छिन्ना भवेत्। प्रधानमन्त्रिणा विशेषतः उल्लेखितं यत् देशविदेशेषु च स्थितानां भारतीयानां सुरक्षा सर्वकारस्य सर्वोच्च प्राथमिकता वर्तते। तेनोक्तं यत् सङ्घर्षस्य आरम्भात् एतावत्पर्यन्तं त्रि-दशांश-सप्त-पञ्च-लक्षमिताः भारतीयाः सुरक्षितं स्वदेशं प्रत्यागताः। प्रधानमन्त्रिणा विज्ञापितं यत् भारते प्रभावितदेशेषु च अहर्निशं नियन्त्रण-कक्षाः कार्यरताः सन्ति। प्रधानमन्त्रिणा विज्ञापितं यत् भारतं स्वस्य षष्टि-प्रतिशतं एल.पी.जी. आवश्यकतायै आयातस्य उपरि निर्भरं वर्तते, अतः सर्वकारेण अस्य उत्पादनं उपलब्धतां च वर्धयितुं कार्य क्रियते । कृषकाणां प्रशंसां कुर्वन् सः अवदत् यत् देशस्य अन्न भण्डारः पूर्णः अस्ति, उर्वरकस्य च समुचिता व्यवस्था कृता। प्रधानमन्त्रिणा व्यापारिक-पोतानां उपरि आक्रमणानां तीव्रा निन्दा कृता। अन्ते सः विश्वासं प्रकटितवान् यत् यथा भारतेन कोरोना-कालस्य सम्मुखीकरणं कृतं तथैव एतस्य सङ्कटस्य अपि दृढतया सम्मुखीकरणं करिष्यति ।

## अमेरिका-इजरायल-ईरान-देशानां मध्ये परस्परं प्रहाराणां प्राबल्येन पश्चिम-एशिया-क्षेत्रे सङ्घर्षः उत्तरोत्तरं संवर्धते



इस्रायल-देशेन हिजबुल्ला-सङ्घटनं विरुध्य स्वकीयं सैन्याभियानं सजवीकृतम्। इस्रायल-वायुसेनया बेरूत-नगरस्य दक्षिण-उपनगरेषु वैमानिक-आक्रमणानां आरम्भो कृतः। एतानि आक्रमणानि तावत् निवासिभ्यः निष्क्रमण-सूचना प्रदाय कृतानि। इस्रायल-सेनायाः वक्तव्यं अस्ति यत् सा सङ्घटनेन सम्बद्धानि केन्द्राणि आधारभूत संरचनानि च लक्ष्यीकरोति । लेबनान-देशे तीव्रतर-सङ्घर्षेण सह मानवीय-सङ्कटमपि निरन्तरं वर्धते। लेबनान-प्रशासनेन विज्ञापितं यत् प्रायः षष्टिसहस्राधिक-सप्तलक्षमिताः जनाः विस्थापिताः अभवन्। दक्षिणभागे स्वास्थ्यकेन्द्रेषु आक्रमणेन आपत्सेवाः बाधिताः। अत्रान्तरे, तेहरान इत्यनेन कठोरतया प्रत्युत्तरं प्रदत्तम् । आइ-आरजीसी-दलेन प्रमाणितं यत् तेन हिन्द महासागरे स्थितं 'डिएगो गार्सिया' इति अमेरिका-ब्रिटेन सैन्य अधिष्ठाने द्वे प्रक्षेपास्त्रे प्रक्षिप्ते। एतेन सङ्घर्षस्य व्याप्तिः अधिकं प्रवर्धमाना दृश्यते। संयुक्त अरब अमीरात-देशे अधिकारिणः अवदन् यत् उच्च-सतर्कतायाः मध्ये अपि स्थितिः नियन्त्रणाधीना वर्तते। निवासिनः आधिकारिक-निर्देशानां पालनाय साग्रहं प्रार्थिताः। वायु-सीम्नि प्रतिबन्धकारणात् विमान सेवाः परिमिताः सन्ति ।

## नवरात्रिविशेषः

### कात्यायनी



**वन्दे वाञ्छितलाभाय चन्द्रार्धकृतशेखराम्।**
**सिंहारूढा चतुर्भुजा कात्यायनी यशस्विनीम्॥**

वाञ्छित फलप्राप्तये अहं तां यशस्विनीं कात्यायनीं वन्दे, या अर्धचन्द्रं शेखरे (मस्तके) धरति, सिंहारूढा अस्ति च चतुर्भुजैः युक्ता अस्ति।

**२. उपासना मंत्र (Upasana Mantra)**

या देवी सर्वभूतेषु माँ
कात्यायनी रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै
नमस्तस्यै नमो नमः॥




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केताः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# विश्व-क्षयरोग-दिवसः-: राष्ट्रपति-महोदयायाः आह्वानम्



विश्व-क्षयरोग-दिवसस्य (World TB Day) पूर्वसन्ध्यायां राष्ट्रपतिः द्रौपदी मुर्मु महोदया अवदत् यत् क्षयरोगः अद्यापि एकः गम्भीरः जनस्वास्थ्य-दुष्कार्यं वर्तते, येन विश्वस्य लक्षाधिकाः जनाः प्रभाविताः सन्ति। स्वसन्देशे राष्ट्रपतिमहोदया व्याहृतवती यत् क्षयरोगात् उत्पन्नायाः वैश्विकदुष्कार्यं प्रति जागरूकतां वर्धयितुं मार्च-मासस्य २४ तमे दिनाङ्के विश्वस्तरे एषः दिवसः आचर्यते।

राष्ट्रपतिः मुर्मु अकथयत् यत् 'टीबी मुक्त भारत' अभियानेन शीघ्रनिदानस्य विस्तारः, निःशुल्क-उपचारस्य सुनिश्चितता, पोषणसम्बन्धि-सहायतायाः सुदृढीकरणं तथा च रोगिणां परिचर्यायां सुधाराय उल्लेखनीयप्रगतिः कृता अस्ति।

राष्ट्रपतिमहोदया उक्तवती यत् एषा प्रगतिः 'राष्ट्रिय-क्षयरोग-उन्मूलन-कार्यक्रमस्य' समावेशात्मकं-सङ्कल्पं प्रदर्शयति। सा सर्वेभ्यः हितधारकेभ्यः क्षयरोगं पूर्णतया उन्मूलयितुं सामूहिक-सङ्कल्पेन सह मिलित्वा कार्यं कर्तुम् आग्रहं कृतवती।

# हिमाचलप्रदेशे तैल-धूम्रतैलस्य उपरि अनाथ- विधवा- उपकरः प्रयोक्ष्यते




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे इदानीं तैलस्य (पेट्रोल), धूम्रतैलस्य (डीजल) विक्रयणकाले अनाथ- विधवा- कल्याणार्थं 'सेस' (उपकरः) प्रयोक्ष्यते। सोमवासरे विधानसभायां विपक्षस्य तीव्र-विरोधस्य मध्ये "हिमाचलप्रदेश- मूल्यवर्धितकर-(संशोधन) विधेयकम् २०२६" पारितम् अभवत्।

**विधेयकस्य मुख्यांशाः**

- नूतनः उपकरः- अस्मिन् विधेयके तैलस्य तथा 'हाई स्पीड डीजल' इत्यस्य उपरि अनाथ- विधवा- उपकरं प्रयोक्तुं प्रावधानं कृतम् अस्ति।
- सीमा- अस्य उपकरस्य अधिकतम-सीमा प्रतिलीटरं ५ रूप्यकाणि निश्चिता कृता अस्ति।
- भार-न्यूनता- सर्वकारेण उक्तं यत् एषः उपकरः एवं प्रयोक्ष्यते येन उपभोक्तॄणां उपरि अनावश्यकः भारः न भवेत्।
- उद्देश्यम्- अस्मात् सञ्चिता राशिः राज्यस्य अनाथानां तथा आर्थिकरूपेण दुर्बलाणां विधवा-महिलानां कल्याणकारी-योजनासु उपयुक्ता भविष्यति।

**राजनीतिक-विवादः**

विपक्षस्य नेतारः अस्य विधेयकस्य विरोधं कुर्वन्तः 'वाकआउट' (सदनत्यागं) कृतवन्तः। भाजपा-विधायकः रणधीर शर्मा अवदत् यत् एषः निर्णयः जनविरोधी अस्ति, अनेन तैलं महर्घं भविष्यति।

**मुख्यमन्त्री महोदयस्य कथनम्-**

मुख्यमन्त्री सुखविन्द्रसिंह सुक्खुः अवदत् यत् विपक्षं विधवा-अनाथ-विरोधी अस्ति। सः स्पष्टीकृतवान् यत् अनेन उपकरेण तैलस्य मूल्यं प्रतिवेशी-राज्यानां (पञ्जाब-हरियाणा) अपेक्षया अधिकं न भविष्यति। अस्य आयः केवलं असहायानां साहाय्यार्थं भविष्यति।

# हिमाचलसर्वकारस्य विश्रामगृहेषु भोज्यसेवानां ('कैटरिंग') बहिःस्रोतीकरणं कर्तुं सज्जता- मुख्यमन्त्री



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः सोमवासरे राज्यविधानसभायां अकथयत् यत् सर्वकारः राज्यस्य विश्रामगृहेषु अतिथिभ्यः उत्तमसुविधाः प्रदातुं 'भोज्यसेवानां' (कैटरिंग) सेवानां 'बहिःस्रोतीकरणं' (Outsource) कर्तुं विचारं करोति। प्रश्नकालस्य मध्ये हस्तक्षेपं कुर्वन् मुख्यमन्त्री अवदत् यत् अनेकेषु विश्रामगृहेषु सम्प्रति उचितभोजनव्यवस्था नास्ति, येन आगन्तुकानां कष्टं भवति। सः केवलसिंहपठानीया महोदयेन उत्थापितानां चिन्तानां उत्तरं ददाति स्म।

मुख्यमन्त्री अवदत् यत् लोकनिर्माणविभागः एकं 'मानक-मेन्यू' (Standard Menu) सज्जीकरिष्यति, यस्मिन् विश्रामगृहेषु उपलभ्यमानानां खाद्यपदार्थानां विवरणं भविष्यति। सः उक्तवान्- "वयं समीपात् 'कैटरिंग' एककानि (Units) चिनुमः, यानि विश्रामगृहेषु निवत्स्यमानानां अतिथीनां कृते भोजनं प्रदास्यन्ति।" अनेन सह सः अवदत् यत् आउटसोर्सिङ्ग- माध्यमेन एतेषां परिसराणां सम्मार्जनं (Maintenance) सौन्दर्यीकरणं च अपि भविष्यति।

**रिक्तानां भवनानाम् उपयोगः**

सदने सुरेशकुमार महोदयेन पृष्टस्य प्रश्नस्य उत्तरे मुख्यमन्त्री अवदत् यत् सर्वकारः रिक्तेषु भवनेषु सर्वकारीयकार्यालयानां स्थानान्तरणाय नीतिं रचयिष्यति, येन एतेषां भवनानां समुचितः उपयोगः सुनिश्चितः भवेत्। तस्मात् पूर्वं उपमुख्यमन्त्री मुकेश अग्निहोत्री अवदत् यत् पूर्वतनभाजपसर्वकारस्य काले निर्मितानि विश्रामगृहाणि पूर्णतया सज्जीकरिष्यन्ते। सः अवदत् यत् बहूनि भवनानि तु निर्मितानि, किन्तु तत्र पर्याप्तकर्मचारिणां नियुक्तिः न अभवत्।

मुकेश अग्निहोत्री महोदयः एतत् अपि अवदत् यत् केषुचित् रिक्तेषु भवनेषु 'वेलनेस सेण्टर' तथा 'स्पा' (Spa) स्थापयितुम् अपि विचारः क्रियते, येन संसाधनानां प्रभावी उपयोगः भवेत्। सः आश्वासितवान् यत् कर्मचारिणां नियुक्तिं कृत्वा सर्वाणि विश्रामगृहाणि निश्चितसमये सञ्चालितानि भविष्यन्ति

# हुतात्म-दिवसः-: राष्ट्रं भगतसिंह-राजगुरु-सुखदेवेभ्यः सादरं श्रद्धाञ्जलिं समर्पितवान्




सम्पूर्णदेशः स्वातन्त्र्य-सेनानिभ्यः भगतसिंह-शिवरामराजगुरु-सुखदेवथापर-महोदयेभ्यः तेषां हुतात्म-दिवसे सादरं श्रद्धाञ्जलिं समर्पिता । भारतस्य स्वातन्त्र्य-आन्दोलने महत्त्वपूर्ण-भूमिकायाः कारणात् आङ्गल-शासकैः एकत्रिंशदधिक-एकोनविंशतितमे वर्षे अस्मिन्नेव दिने लाहौर-नगरे एतेभ्यः मृत्युदण्डः प्रदत्तः। तेषां त्याग-स्मृतौ भगतसिंहस्य पैतृक-ग्रामे खटकड़कलां इत्यत्र राज्य-स्तरीय कार्यक्रमः समायोज्यते। अत्रावसरे उप-राष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी तथा च अन्ये नेतारः हुतात्म-वीरेभ्या० श्रद्धाञ्जलिं समर्पितवन्तः। लोकसभा-राज्यसभा इत्यनयोः उभयोः सदनयोः अपि एतेभ्यः त्रिभ्यः क्रान्तिकारिभ्यः सम्मानं विज्ञापितं। राज्यसभायाः सभापतिः राधाकृष्णन् इत्येषः अवदत् यत् तेषां बलिदानं केवलं स्वातन्त्र्य-सङ्ग्रामस्य घटना नासीत्, अपितु एषः सः निर्णायक-क्षणः आसीत् येन राष्ट्रस्य चेतना जागृता, उपनिवेष-शासनं विरुध्य एकतायाः प्रेरणा प्रदत्ता।

वित्त-विधेयकं

# निर्वाचनायोगस्य निर्णयः-: राजनैतिक-दलेभ्यः दूरदर्शन-आकाशवाण्योः निःशुल्क-प्रसारण-सुविधा




भारत-निर्वाचनायोगेन चतुर्षु राज्येषु, एकस्मिन् केन्द्रशासित प्रदेशे च आगामि-विधानसभा-निर्वाचनार्थं राष्ट्रिय-राज्यस्तरीय-दलानां कृते दूरदर्शन-आकाशवाण्योः निःशुल्क-प्रसारण-निमित्तं डिजिटल-प्रमाणकानि वितरितानि। अस्याः योजनायाः अन्तर्गतं प्रत्येकस्मै दलाय दूरदर्शन-आकाशवाण्ययोः माध्यमेन निःशुल्क-प्रसारण-सुविधार्थं पञ्चचत्वारिंशत् निमेषाणां समयः आवंटितः अस्ति। एषा सुविधा राज्यस्य प्रादेशिक-सञ्चालस्य अन्तर्गतं सर्वेभ्यः दलेभ्यः समानरूपेण उपलप्स्यते।

# भारत-चीन-सीमा-व्यापारः-: शिपकी-ला मार्गस्य पुनरुद्धारः

हिमाचल-प्रदेशस्य किन्नौर-जनपदे स्थितस्य शिपकी-ला मार्गस्य माध्यमेन भारत-चीन-देशयोः मध्ये सीमा-व्यापारः जून-मासस्य प्रथम-दिनाङ्कात् पुनः आरप्स्यते। व्यापारस्य सुचारु-सञ्चालनाय किन्नौर-जनपद-प्रशासनेन सज्जाः तीव्रीकृताः सन्ति।

पूह-उपमण्डलस्य नामग्या-पञ्चायतस्य छुपान-क्षेत्रे व्यापारिणां कृते आपणाः (शोप्स) भाण्डागाराणि (गोदाम) च निर्मीयन्ते। अस्यां व्यापार-व्यवस्थायां चत्वारिंशत् (४०) प्रकारकाणां उत्पादानां विनिमयः भविष्यति। एतेषु गोधूमचूर्णं (आटा), तण्डुलं, गुडं, तैलं, हरिद्रा, उपस्कराः (मसाले), लवणं, कम्बलानि, पात्राणि तथा च शुष्कफलानि इत्यादीनि स्थानीयानि वस्तूनि सम्मिलितानि सन्ति।

# सरदार पटेल विश्वविद्यालये मंडी इत्यत्र आयोजितः शहीदीदिवस- कार्यक्रमः




**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, मंडी**
सरदारपटेल विश्वविद्यालये मंडी इत्यत्र शहीदी दिवसस्य अवसरे एकस्य प्रभावशालिकार्यक्रमस्य आयोजनं जातम्। कार्यक्रमोऽयं माण्डव्य- छात्र- अध्ययनमण्डलस्य, इतिहासविभागस्य, भौतिकी विभागस्य च संयुक्ततत्त्वावधानेन आयोजितः। कार्यक्रमस्य विषयः- "अमर बलिदानी- इतिहास के प्रेरणास्रोत" इति आसीत्।

कार्यक्रमे विद्यार्थिनः, शोधार्थिनः प्राध्यापकाश्च अतीवोत्साहेन भागं ग्रहीतवन्तः। विश्वविद्यालयस्य सर्वे अधिष्ठातारः, विभिन्नविभागानां अध्यक्षाः, प्राध्यापकाः, कर्मचारिणः, नगरस्य गणमान्यजनाः चापि उपस्थिताः आसन्। माण्डव्य- छात्र- अध्ययन- मंडलस्य अध्यक्षः अमनवर्यः अपि कार्यक्रमे विशेषरूपेण उपस्थितः आसीत्।

मुख्यातिथिः कुलपतिः ललितकुमार अवस्थी, अध्यक्षत्वेन च कुलसचिवः शशिपाल नेगी आसीत्। अस्मिन् अवसरे मुख्यवक्तारूपेण प्रो. वीरसिंह रांगड़ा, भौतिकीविभागः, हिमाचलप्रदेश विश्वविद्यालयः शिमला उपस्थितः आसीत्।

कार्यक्रमस्य प्रारम्भे इतिहासविभागाध्यक्षः डॉ. राकेशशर्मा कार्यक्रमस्य रूपरेखां प्रस्तुतवान्, अतिथीनां च परिचयं कारितवान्। छात्रकल्याण- अधिष्ठाता प्रो. राजेशशर्मा सर्वेषाम् औपचारिकं स्वागतम् अकरोत्। प्रो. राजेशः अस्य दिनस्य महत्त्वमपि प्रकाशितवान्। अध्यक्षीयसंबोधने कुलसचिवः शशिपालनेगीवर्यः उक्तवान् यत् एतादृशानि आयोजनानि अस्माकं गौरवशाली इतिहासं स्मारयन्ति, अस्माभिः च तेभ्यः प्रेरणा स्वीकरणीया। तेन कथितं यत् अस्माकं देशस्य वीरैः स्वप्राणानां बलिदानं दत्त्वा अस्मभ्यं स्वतन्त्रता प्रदत्ता, येन कारणेन अद्य वयं स्वविचारान् स्वतन्त्ररूपेण प्रकटयितुं समर्थाः स्मः।

मुख्यवक्ता प्रो. वीरसिंहरांगड़ा महोदयः स्वसम्बोधने अवदत् यत् शहीददिवसः केवलं स्मरणस्य दिवसः नास्ति, अपि तु प्रेरणाप्राप्तेः अवसरः अस्ति। सः सरदार-भगतसिंह-सुखदेव-राजगुरूणाम् जीवनस्य बलिदानस्य च विस्तारपूर्वकं वर्णनं कृतवान्। सः अकथयत् यत् एतैः महान्- क्रान्तिकारिभिः अल्पायुष्वेव अवगतं यत् देशस्य स्वतन्त्रता सर्वोपरि अस्ति। मात्र २३-२४ वर्षीयवयसि तैः हसन्तः शूलं (फांसी) स्वीकृतम्। सः अग्रे अवदत् यत् भगतसिंहः केवलं क्रान्तिकारी एव नासीत्, अपितु एकः गम्भीरः विचारकः अपि आसीत्। तस्य विश्वासः आसीत् यत् वास्त्विकी क्रान्तिः विचारैः आगच्छति। सः समाजे असमानता- निर्धनता- अन्यायानां विरुद्धं स्वरम् उत्तोलितवान्, अस्मान् शिक्षितवान् यत् एकस्य सशक्तसमाजस्य निर्माणाय अधिकारैः सह कर्तव्यानां बोधः अपि आवश्यकः अस्ति। सः युवान् आहूतवान् यत् ते देशभक्तिं केवलं शब्देषु सीमितां न कुर्यन्, अपि तु स्वकार्येषु तां प्रदर्शयन्तु।मुख्यातिथिः कुलपतिः आचार्य- ललितकुमार- अवस्थी महोदयः स्वभाषणे अवदत् यत् मुख्यवक्त्रा भगतसिंह- सुखदेव-राजगुरूणां विचाराः गुणाश्च अतीव प्रभावशालिढङ्गेन प्रस्तुताः। सः अकथयत् यत् एतेषां क्रान्तिकारिणाम् उद्देश्यं केवलं जागरूकतायाः प्रसारः आसीत् तथा तैः कोलाहलं विना स्पष्टलक्ष्येण सह कार्यं कृतम्। एतत् अस्माकं कृते प्रेरणा अस्ति यत् वयमपि स्वविचारान् सन्देशं च सम्यक् रणनीत्या सह अधिकाधिकजनान् यावत् प्रापयाम। सः अवदत् यत् यदि समाजे परिवर्तनम् आनेतव्यं तर्हि अस्माभिः स्वपक्षः प्रभावपूर्णरीत्या उपस्थापनीयः, येन अधिकाधिकजनाः तेन सह जुष्टुं शक्नुयुः। सः राजगुरोः उदाहरणं दत्त्वा अवदत् यत् अस्माभिः स्वक्षमतानां गुणानां च उपयोगः सम्यक् दिशि करणीयः।

कुलपतिः ललितकुमार अवस्थी महोदयः भगतसिंहस्य अन्तिमपत्रस्य उल्लेखं कुर्वन् अवदत् यत् सः (भगतसिंहः) स्वकीयं सर्वोच्चबलिदानं देशं प्रति स्व- इच्छानां केवलं लघु-अंशमेव मन्यते स्म। सः अकथयत् यत् तस्मै स्वबलिदाने गर्वः आसीत् तस्य देशप्रेम च अतीव गभीरम् आसीत्। सः युवान् प्रति प्रश्नं कुर्वन् अवदत् यत् किं अद्यतनयुवकेषु तादृशः उत्साहः अस्ति? सः मादकद्रव्य- सेवनसदृशीनां सामाजिकसमस्यानां विषये चिन्तां प्रकटयन् अवदत् यत् युवभिः जागरूकैः भवितव्यं तथा समाजस्य मार्गदर्शने स्वकर्तव्यं पालनीयम्।

सः एतदपि अवदत् यत् स्वच्छताभियानसदृशाः प्रयत्नाः तावत्पर्यन्तं सफलाः न भवन्ति यावत् ते जन-आन्दोलनस्य रूपं न गृह्णन्ति। एतदर्थं समाजस्य प्रत्येकं जनं, विशेषतः युवान् अग्रे आगन्तव्यम्। सः सुझावम् अददात् यत् लघवः प्रयत्नाः, यथा नुक्कड़- नाटकानां माध्यमेन सामाजिकविषयेषु जागरूकताप्रसारः, अतीव प्रभाविनः भवितुं शक्नुवन्ति। अन्ते सः अवदत् यत् यदि एकः भगतसिंहः स्वबलिदानेन सम्पूर्णं देशं प्रेरितुं शक्नोति, तर्हि वयं सर्वे मिलित्वा समाजस्य समस्याः दूरीकर्तुं शक्नुमः तथा एकस्य समृद्धस्य विकसितस्य च भारतस्य निर्माणे योगदानं दातुं शक्नुमः। कार्यक्रमस्य समापनं धन्यवादज्ञापनेन सह अभवत्। आयोजकाः सर्वान् अतिथीन् प्रतिभागिनश्च प्रति कृतज्ञतां प्रकटितवन्तः।

# पर्यटनस्य अपूर्वः सङ्गमः दक्षिणभारतीयशैल्यां निर्मितं ४०० वर्षपुरातनं मलाह- माता-सुकराला-मन्दिरम्



**हिमसंस्कृतवार्ताः - धर्मशाला।** हिमाचलप्रदेशस्य काङ्गड़ा-जनपदे शाहपुर-विधानसभाक्षेत्रस्य 'बोह' समीपे रुलहेड़ ग्रामे स्थितं मलाह-माता-सुकराला-मन्दिरम् अद्यत्वे आस्थायाः, वास्तुकलायाः, प्राकृतिकसौन्दर्यस्य च अनुपमः सङ्गमः अस्ति। मन्दिरसमित्याः अध्यक्षस्य विजयशर्मणः अनुसारं मन्दिरस्य इतिहासः प्रायः ४०० वर्षपुरातनः वर्तते। प्रकृतेः अङ्के स्थितं एतत् मन्दिरं स्वकीयया विशिष्टया 'दक्षिण-भारतीय-स्थापत्यशैल्या' (Dravidian Style) कारणेन प्रदेशस्य पवित्रतीर्थस्थलेषु अन्यां परिचयं धारयति। अस्य मन्दिरस्य जटिला नक्काशी, कलात्मकं शिल्पचातुर्यं, भव्या संरचना च न केवलं भक्तान् अपितु पर्यटकान् अपि आकर्षयति।

## ऐतिहासिकः आधारः निर्माणञ्च

स्थानीयमान्यतानुसारं, गौतम-ब्राह्मण-वंशस्य पूर्वजाः माता-सुकरालायाः एकं पवित्रं त्रिशूलं विरावली (जम्मु) स्थितप्राचीनमन्दिरात् अत्र 'बोह' क्षेत्रं प्रति आनीतवन्तः आसन्। यद्यपि तस्मिन् समये मन्दिरनिर्माणस्य योजना पूर्णा न अभवत्, किन्तु पश्चात् पृथ्वीराजशर्मणा अस्य आरम्भः कृतः। तदनन्तरं तस्य पुत्राभ्यां प्रकाशचन्द्रशर्मणा तथा विजयशर्मणा स्थानीयभक्तानां सहयोगेन निर्माणकार्यं अग्रे नीतम्। अन्ततः २०२२ तमे वर्षे मन्दिरस्य निर्माणं पूर्णं जातम्।

**शिल्पकलायाः वैशिष्ट्यम्-** अस्य मन्दिरस्य निर्माणे ओडिशा राज्यस्य कुशलाः शिल्पिनः सूक्ष्मां नक्काशीं कृतवन्तः। निर्माणाय प्रयुक्तः पाषाणः (Stone) चम्बा जनपदात् आनीतः आसीत्। एषा संरचना अत्रत्यक्षेत्रे दुर्लभा अस्ति, यतः इयं दाक्षिणात्य-सौन्दर्यं (South Indian Aesthetic) प्रकटयति।

**चमत्कारिकी किंवदन्ती** माता-सुकरालायाः दिव्यशक्तिसम्बद्धा एका प्रसिद्धा कथा अस्ति। मन्यते यत् यदा चम्बा-नरेशः एकदा देव्याः शक्तौ प्रश्नं कृतवान्, तदा जम्मु-स्थितमन्दिरस्य समीपे एकः शुष्कः 'लसोड़ा' वृक्षः तत्क्षणमेव हरितः (हरा-भरा) अभवत्। अनेन देव्याः चमत्कारे जनविश्वासः अधिकः दृढः जातः।

**धार्मिकं पर्यटनञ्च-** सम्प्रति मन्दिरे त्रयः पवित्राः रूपाः— माता सुकराला (लक्ष्मी रूपम्), माता काली, तथा माता सरस्वती च प्रतिष्ठिताः सन्ति। भक्ताः ऐश्वर्यस्य, शक्तेः, ज्ञानस्य च आशीर्वादाय अत्र आगच्छन्ति। मन्दिरस्य शोभां समीपे एव बोह-घाटी स्थितः एकः मनोहरः जलप्रपातः (Waterfall) वर्धयति। रुलहेड़-स्थितं एतत् मन्दिरं अद्य भक्ति-संस्कृति-शिल्पकलानां अद्भुतं मिश्रणं वर्तते।

# अयोध्यायाम् अर्चक-प्रशिक्षण-केन्द्रे भव्यः यज्ञोपवीत-संस्कार-समारोहः सम्पन्नः

**हिमसंस्कृतवार्ता अयोध्याधाम (उत्तरप्रदेशः):** विश्ववेदसंस्थानद्वारा सञ्चालिते, विश्वहिन्दूपरिषदः उपक्रमेण अर्चक-पुरोहित-प्रशिक्षणकेन्द्रे (२३ मार्च २०२६) यज्ञोपवीत-संस्कारस्य एकं भव्यं सुव्यवस्थितं च आयोजनं सफलतया सम्पन्नम्। अस्मिन् पावने अवसरे वैदिक-विधिना, मन्त्रोच्चारणपूर्वकं च बटूनां उपनयन-संस्कारः कृतः।

**विशिष्टातिथीनां उपस्थितिः**-अस्मिन् पुण्यप्रदे कार्यक्रमे अनेके गणमान्याः विशिष्टजनाः उपस्थिताः आसन्, येषु मुख्याः सन्तिः
कोटेश्वर शर्मा (अन्तर्राष्ट्रीय-सङ्गठनमन्त्री) अरुण नेकटे (अर्चक-मन्दिर-पुरोहित-आयाम-प्रमुखः) स्वामी सूर्यानन्दः (प्रशिक्षण-प्रमुखः) प्रोफेसर लक्ष्मीकान्तः (प्रशिक्षण-केन्द्र-समिति-अध्यक्षः) आचार्यः राहुल झा एवं आचार्यः सत्यममिश्रः

**धर्मस्य रक्षायाः सङ्कल्पः**-कार्यक्रमस्य अन्तर्गतं वक्तृभिः वैदिक-संस्कृतेः संस्कार-परम्परायाः च महत्त्वं विस्तरेण प्रतिपादितम्। स्वकीये सारगर्भिते उद्बोधने विद्वद्भिः उक्तं यत् —"धर्मो रक्षति रक्षितः" — यदि वयं धर्मस्य रक्षणं कुर्मः शास्त्राणां च अनुसरणं नित्यं आचरामः, तर्हि धर्मः एव अस्माकं सर्वदा रक्षणं करोति।

**समापनम्**-सम्पूर्णः कार्यक्रमः अत्यन्तं श्रद्धापूर्वकं, भक्तिमये उत्साहपूर्णे च वातावरणे सम्पन्नः। अन्ते सर्वेभ्यः मङ्गलकामनाः आशीर्वचनानि च प्रदत्तानि, तदनन्तरं विधिवत् कार्यक्रमस्य समापनम् अभवत्।

## "लौकिकन्यायकोशः"
## "अगतिकगतिन्यायः"

कस्मिंश्चिद् विषये उपाय एव न भवति चेत् अल्पस्य महतः वा मार्गस्य आधारेण तरणोपायः मार्गणीयः भवति। तदा आश्रयरूपेण स्वीकृतः कियानपि क्षुल्लकः भवतु साधनस्य अपेक्षया समयस्य एव महत्त्वम् अधिकं भवति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/महाराष्ट्रम्**

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः



**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अहो, अद्य एका चित्ताकर्षिकी वार्ता श्रुता। बाहामा-द्वीपात् केनचित् छात्रेण समुद्र-जले क्षिप्ता कूपी पोर्चुगल-देशस्य तटं प्राप्ता। बहुभ्यः वर्षेभ्यः पूर्वं सा कूपी जलाशये निक्षिप्ता आसीत्। तया सह मैत्री-सन्देशः अपि प्रेषितः आसीत्। अधुना ते द्वे अपि मित्रे सञ्जाते स्तः।

**नन्दिनी-** सत्यम्, एषा वार्ता अस्मान् बोधयति यत् संसारः अतिलघुः अस्ति। एतत् श्रुत्वा मया बेङ्गलूरु-नगरस्य एका घटना स्मृता। तत्र अनिल-कुम्बले-चतुष्पथे केनचित् धनिकेन युवकेन उच्चमूल्य-वाहनेन सह साहाय्यं विना भ्रमरावर्तः कृतः। एतत् दुस्साहसं दृष्ट्वा आरक्षकैः तत् वाहनं गृहीतम् अस्ति। तस्य चालकस्य उपरि अभियोगः अपि पञ्जीकृतः अस्ति।

**काव्या-** मार्गः तु गमनाय भवति, न तु क्रीडनाय। आरक्षकैः उचितं कार्यं कृतम्। परं पश्य, समाज-माध्यमेषु अन्या एका चर्चा प्रचलति। कश्चित् स्वामी स्वस्य भृत्यायै क्रुद्धः भूतः। किमर्थम् इति चेत्, तया पूर्वमेव रुग्ण-विश्रामस्य सूची दत्ता। स्वामिना चिन्तितं यत् रुग्णता कथं पूर्व-नियोजिता भवितुं शक्नोति? परं जनैः तस्य स्वामिनः उपरि एव आक्रोशः प्रकटितः अस्ति।

**नन्दिनी-** साहायिकानां कार्यं तु कष्टकरं भवति, अतः तासाम् विश्रामः अनिवार्यः। शृणु, अद्य नेदरलैण्ड्-देशस्य एका महिला भारतस्य बाल-पालन-पद्धतिं वर्णितवती अस्ति। तया उक्तं यत् भारते मातापितरः बालकान् प्रति अति-रक्षकाः भवन्ति, परं डच-देशे बालकाः स्वतन्त्राः भूत्वा सर्वत्र एकाकिनः भ्रमन्ति। भारते शिक्षणस्य उपरि अधिकं बलं दत्तम् अस्ति।

**काव्या-** द्वयोः देशयोः पद्धतयः भिन्नाः सन्ति, परं स्नेहेन एव बाल-पोषणं क्रियते। अद्यतनी वार्ता एतावती एव। धन्यवादः।

## सीता-राम स्मृति संस्कृत सम्भाषण - प्रतियोगितायाः परिणामः मार्चः २०२६



**प्रथम पुरस्कारः**-डॉ रश्मि कुमारी ,संस्कृत विभागाध्यक्ष राजकीय महिला महाविद्यालय गुलजारबाग, पटना बिहारः।

**द्वितीयपुरस्कारः**-डॉ दीप्ति कुमारी , संस्कृत विभागाध्यक्ष, एम.एल.टी. महविद्यालयः ,सहरसा बिहारः। डॉ विश्वजीत रुद्र पालः - प्रांत सहसंयोजक , सिलचर, असमः।

**तृतीयपुरस्कारः**-तारा विश्वकर्मा - भोपाल, मध्यप्रदेशः। वन्दना पटेरिया - आङ्लशिक्षिका, सागर मध्यप्रदेशः।

**विशेषपुरस्कारः**-डॉ रागनी कुमारी - संस्कृत शिक्षिका, पटना ,बिहारः। उमा हनोते संस्कृत शिक्षिका, सागर ,मध्यप्रदेशः।देवेश प्रकाशः संस्कृत शिक्षकः , दिल्ली ।

निर्णायक मण्डलस्य सदस्याः प्रो०रागिनी वर्मा-राष्ट्रीय संयोजिका, आधुनिको भव संस्कृतं वद अभियान
डॉ लीना चौहानः, राष्ट्रीय उपाध्यक्षा, आधुनिको भव संस्कृतं वद अभियान
डॉ नीरा कुमारी, राष्ट्रीय कार्यकारिणी सदस्या, आधुनिको भव संस्कृतं वद अभियानम्
डॉ मुकेश कुमार ओझा राष्ट्रीय अध्यक्षः आधुनिको भव संस्कृतं वद अभियानम्



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा -१४

विविधेभ्यः प्राचीनकथाप्रसङ्गेभ्यः महत्त्वपूर्णं ज्ञानं लब्धुं शक्यते मनुष्यजीवने। तादृशी एका कथा भाषाभ्यासाय अत्र प्रस्तौतुं प्रयत्यते। कथा एवमस्ति- पितामहः भीष्मः महान् ज्ञानी, दृढव्रतश्च आसीत्। परन्तु तस्मिन् अन्नदोषस्य दुष्प्रभावस्य कारणतः बुद्धिभ्रमः सञ्जातः। एतस्मिन् प्रसङ्गे एका कथा आयाति महाभारतग्रन्थे। पितामहः शरशय्यायां शयानः सन् धर्मोपदेशं कुर्वन् आसीत् कदाचित्। स बहु सुन्दरं ज्ञानप्रदञ्च प्रसङ्गं कथयन् आसीत्। आर्तजनः कथं परित्रातुम्, आश्वासयितुं वा शक्यः इत्येतादृशः प्रसङ्गः आसीत् तस्य। एतच्छ्रुत्वा द्रौपदी सहसा उच्चैः हसितवती।

भीष्मः तद्दृष्टवान्। सः पृष्टवान्- " पुत्रि! अस्थाने किमर्थं तव एवं हसनम्?" द्रौपदी सङ्कुचिता जाता, सा वक्तुं नेच्छति स्म। "न, पितामह! न कोऽपि विशेषः" इत्युक्त्वा सा मौनम् अधरत्। भीष्मः पुनरुक्तवान्- "कुलवधवः वृथा एवं न हसन्ति, तासां सुलक्षणं भवति यत् ताः अकारणं न हसेयुरिति। तव हसनस्यः पृष्ठतः किमपि रहस्यं स्यात्, कथ्यतां निस्सङ्कोचं, किं तत्?" इति।
तदा द्रौपदी उक्तवती- "पितामह! वक्तव्यन्तु स्यादेव मे, परन्तु तद्वक्तुं मयि भृशं सङ्कोचोऽत्र" इति। स उक्तवान्- "सङ्कोचः किमर्थम्, मास्त्वत्र, साहसपूर्वकम् उच्यताम्" इति। ततः द्रौपदी निगदितवती- "मयि हासः आगतः तत्रभवतः उपदेशं विश्रुत्य। अद्य भवान् एतावतः उपदेशान् ददानः विराजते, परन्तु यस्मिन् समये राजसभायां मम शाटिका कर्ष्यमाणा आसीत्, अहम् आर्ततया क्रन्दन्ती, आह्वयन्ती चासम् यत्- 'हे पितामह ! मां रक्षतु, रक्षतु!' इति तत् समये भवतः एतत् ज्ञानं क्व गतमासीत्? अहन्तु चिन्तयामि यत् भवान् एतज्ज्ञानम् अनन्तरं कदाचित् हि लब्धवान् स्यादिति अभात्। अतो भवतः एतादृशं ज्ञानं विश्रुत्य मयि सद्यः हासः मुखतः आगतोऽस्ति " इति। एवं द्रौपद्याः वचनम् आकर्ण्य पितामहस्य नेत्राभ्याम् अश्रूणि निःसृतानि। स कम्पमानेन कण्ठध्वनिना अब्रवीत्- "प्रिये पुत्रि! त्वं सत्यमेव उक्तवती। तत्समये मयि एतज्ज्ञानं नासीत्, परन्तु अहं तदनन्तरं हि तद्विषयं शिक्षितवान् इति तु नैव, पूर्वमपि तत्सर्वं मयि आसीत्, परन्त्वहं दुर्योधनस्य अन्नं खादामि, यदन्नं दूषितं, अन्यायोपार्जितञ्च अवर्तत। सः पाण्डवानाम् अधिकारम् अपहृत्य, तदुपरि अन्यायपूर्वकं स्वाधिकारं स्थापितवान् आसीत्। एतत्कारणतः हि मे मतिरपि मृतवत् जाता अभवत्। इदानीम् अस्मिन् रणे तदन्नात् समुद्भवं सम्पूर्णं रुधिरं पूर्णतो बहिर्निर्गतमस्ति, इतिकारणतो मे सद्यः अन्तःकरणं पवित्रं जातमस्ति, तज्ज्ञानमपि मया पुनः प्राप्तमस्ति सम्प्रति। अत एव अहमिदानीं ज्ञानोपदेशं कुर्वन्नस्मि " इति महाभारत-प्रसङ्गः। पूर्वम् अनधिकारयुक्तं धनं केनापि कारणेन यदि गृहं प्रविशेत् तर्हि तत्कालिकाः जनाः चिन्तयन्ति स्म यत् गृहे विषं हि प्रविष्टमस्तीति; तद्दूरीकर्तुञ्च प्रयतन्ते स्म। परन्तु अद्यत्वे केनापि व्याजेन प्रभुतं सत्वम्, अधिकारः वा स्वपार्श्वे समागच्छेत्, येन च उन्नतजीवनं यापयितुं शक्यते इत्येतादृशं चिन्तनं प्रायशः जनेषु अवलोक्यते। अत एव अद्यतनानां बुद्धिः तमसाच्छन्ना जायमानास्ति। 'सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति।अद्य वयं पतनाभिमुखिनः सर्वथा, अस्माकं नैतिकपतनं जायमानमस्ति। अद्यतनः समाजः, अद्यतनाः नेतारः, अद्यतनाः अग्रगण्याः पुरुषाश्च कथयन्तः सन्ति यत् अस्माकं उन्नतिः वर्धमाना अस्ति, अस्माकम् उत्थानं जायमानमस्ति चेति। परन्तु एतदनर्गलमात्रम्! यथाशक्यं परस्वत्वं न कदापि, न केनापि अपहरणीयं चेन्मात्रं व्यक्तेः समाजस्य राष्ट्रस्य चोन्नतिः आशां कर्तुं शक्या, नान्यथेति, शुभम्।